**Pratidhwani the Echo**
*A Peer-Reviewed International Journal of Humanities & Social Science*
***ISSN: 2278-5264 (Online) 2321-9319 (Print)***
***Impact Factor: 6.28** (Index Copernicus International)*
**UGC Approved, Journal No: 48666**
*Volume-VII, Issue-IV, April 2019, Page No. 347-354*
*Published by Dept. of Bengali, Karimganj College, Karimganj, Assam, India*
*Website: http://www.thecho.in*

# *क वकर्णपूरद्दशा लक्षणामूल: ध्वनि:*

**Dr. Anup Kumar Rano**
*HOD & Asst. Professor, Dept. of Sanskrit, Chandidas Mahavidyalaya, Khujutipara, Birbhum, W.B.*

**Abstract**

*Kavikarnapura, a great Vaishnava poet was born at Kanchrapara in Nadia district of West Bengal in the year 1524. He was the son of Sivananda Sen, a pupil of Mahaprabhu Shrichaitanya. Karnapura was a pupil of Shrinath Acharya. The word Karnapura is not a proper name, but only a title said by Chaitanya. In other places his name is indicated as Paramanandadasa or Puridasa. In front of Chaitanya he uttered a sloka in arya metre and Chaitanya was very much pleased and said that you are ear ornament of poets or Kavikarnapura. Alamkarakaustubha is a great work of Kavikarnapura in the field of Vaishnava Sanskrit Poetics. The work deals with in ten kiranas all the important topics of Sanskrit poetics except dramaturgy. The ten kiranas are- 1. Kavya-samagri, 2. Shabdartha, 3. Dhvani, 4. Gunibhutavyangya, 5. Rasa, 6. Gunas, 7. Shabdalamkaras, 8. Arthalamkaras, 9. Riti and 10. Dosha. The 3rd kirana of Alamkarakaustubha is devoted to the concept and classification of dhvani. Karnapura defines dhvani as follows—*

*"shabdārthadibhiranyaiśca dhvanyate asāviti dhvaniḥ".*

*Dhvani is a kind of meaning where the word and conventional or primary meaning suggest the intended or implied meaning. There are two main divisions of dhvani- avivakshitavachya and vivakshitanyaparavachya. Avivakshitavachya is based on lakshana and is also called lakshanamula. Vivakshitanyaparavachya is related with the primary sense or abhidha. Hence it is called as abhidhamula. Avivakshitavachyadhvani is again divided into two: arthantarasamkramitavachya and atyantatiraskritavachya. Vivakshitanyaparavachya is also divided into two: samlakshyakramavyangya and asamlakshyakramavyangya. Asamlakshyakramavyangya is rasadhvani.*

*The paper deals with the definition of dhvani, the characteristics of lakshanamula dhvani and the varieties of lakshanamula dhvani. This paper is an analytical work on Alamkarakaustubha, but sometimes we have accepted the method of comparative study.*

***Keywords:** Kirana, Dhvani, Lakshanamula, Abhidhamula, Avivakshitavachya, Vivakshitanyaparavachya, Arthantarasamkramitavachya and Atyantatiraskritavachya.*

प्रसिद्ध: वैष्णवकवि: कविकर्णपूर: वङ्गदेशस्य नदीयामण्डलान्तर्गते काञ्चनपल्लीनामके (काँचडापाडा) स्थाने वैद्यसम्प्रदाये १५२४-ख्रीष्टाब्दे अजायत। तस्य प्रकृतनाम परमानन्ददास:। तस्य पिता शिवानन्दसेन: चैतन्यदेवस्य शिष्य: आसीत्। आचार्य: कविकर्णपूरो विभिन्नशास्त्रेषु अतीव पण्डित आसीत्। तेन एकादशग्रन्था विरचिता:। ते यथा- १.चैतन्यचरितामृतमहाकाव्यम्, २.चैतन्यचन्द्रोदयनाटकम्, ३.गौराङ्गगणोद्देशदीपिका, ४.आनन्दवृन्दावनचम्पू:, ५.कृष्णाह्निककौमुदी, ६.चमत्कारचन्द्रिका, ७.वर्णप्रकाश:, ८.कृष्णलीलोद्देशदीपिका/ वृहद्गणोद्देशदीपिका ९.आर्याष्टकम्, १०.मृतमोहकाव्यम्, ११.अलङ्कारकौस्तुभश्च। तेषु अलङ्कारकौस्तुभ: अलङ्कारशात्रस्य एक: प्रसिद्ध: ग्रन्थ:। अस्मिन् ग्रन्थे आचार्यो नाट्यतत्त्वं विहाय अलङ्कारतत्त्वस्य विविधानां विषयाणां विवेचनं कृतवान्। अस्मिन् ग्रन्थे दश किरणा: सन्ति। एतेषां किरणानामालोच्यो विषयो यथाक्रमम्—

१.काव्यसामग्री, २. शब्दार्थवृत्तित्रयनिरूपणम्, ३. ध्वनि:, ४. गुणीभूतव्यङ्ग्यनिर्णय:, ५. रस:, ६. गुण:, ७. शब्दालङ्कार:, ८. अर्थालङ्कार:, ९. रीति:, १०. दोषश्च।
तृतीये किरणे तेन ध्वनितत्त्वम् आलोचितम्। ग्रन्थकारस्य मतेन ध्वनि: काव्यस्य प्राणा:। ध्वनि: काव्यस्य मूलतत्त्वम्। ध्वनिविहीनं काव्यं प्राणहीनं शरीरमिव निरर्थकम्।

काव्ये ध्वने: गुरुत्वमतिप्राचीनकालादेव स्वीक्रियते। अग्निपुराणस्य ३४४-तमे अध्याये ध्वनेर्लक्षणं कथितम्—

*“श्रुतेरलभ्यमानोऽर्थो यस्माद् भाति सचेतन:।*
*स आक्षेपो ध्वनि: स्याच्च ध्वनिना व्यज्यते यत:॥*
*शब्देनार्थेन यत्रार्थ: कृत्वा स्वयमुपार्जनम्।*
*प्रतिषेध इवेष्टस्य यो विशेषोऽभिधित्सया॥*
*..................................................*
*एषामेकतमस्येव समाख्या ध्वनिरित्यत:॥”*[1]

ध्वनितत्त्वविषयकग्रन्थेषु आचार्यस्य आनन्दवर्धनस्य ध्वन्यालोकोऽतीव प्रसिद्ध:। ध्वने: लक्षणविषये ध्वनिकार आह—

*“यत्रार्थ: शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।*
*व्यङ्क्त: काव्यविशेष: स ध्वनिरिति सूरिभि: कथित:॥”*[2]

-यत्र वाच्यार्थ: स्वार्थं, शब्दो वाच्यार्थञ्च गुणीभूतं कृत्वा तं प्रतीयमानार्थं प्रकाशयत:, तत्काव्यमेव ध्वनिकाव्यम्। ध्वनिलक्षणं काव्यप्रकाशकारेणोक्तम्—

*“इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधै: कथित:”।*[3]

अर्थाद् यस्मिन् काव्ये वाच्यापेक्षया व्यङ्ग्यस्यैव प्राधान्यं दृश्यते, तदेव ध्वनिकाव्यम्। अनुरूपभावेन साहित्यदर्पणकारो विश्वनाथ आह—

“वाच्यातिशयिनि व्यङ्ग्ये ध्वनिस्तत्काव्यमुत्तमम्”।[4]

आचार्य: कविकर्णपूरो ध्वनिलक्षणमाह—

*"शब्दार्थादिभिरन्यैश्च ध्वन्यतेऽसाविति ध्वनि:"*[5]

अर्थाद् वाच्य-लक्ष्य-व्यङ्ग्यादिभि: शब्दैरर्थैश्च, श्लेषस्थले पदान्तरसम्बन्धेन तथा अनुकरणशब्दैर्ध्वन्यते व्यञ्जनवृत्त्या वोध्यते असौ ध्वनि:। शब्दार्थावत्र गुणीभूतौ, व्यङ्ग्यार्थस्यैव प्राधान्यम्।

विविधप्रकारेण ध्वनिश्ब्दस्य व्युत्पत्तिर्भवति। यथा 'ध्वननं ध्वनि'रिति भाववाच्यनिष्पन्नो ध्वनिशब्द:। करणव्युत्पत्त्या 'ध्वन्यतेऽनेनेति ध्वनि:'। तथा 'ध्वन्यतेऽस्मिन्निति ध्वनि'रिति अधिकरणसाधनोऽपि भवति। परन्तु ग्रन्थकारेण 'ध्वन्यतेऽसाविति ध्वनि'रिति कर्मसाधनमेव स्वीकृतम्। न तु ध्वननं ध्वनिरिति भावसाधनं, तथा सति ध्वन्यर्थविषयकज्ञानेऽपि ध्वनिव्यवहारापत्ते:। भावार्थे ध्वनिपदपरामर्शो यथा ध्वन्यालोके चतुर्थोद्योते—

*"यत् काव्यतत्त्वविषयस्फुरितप्रसुप्तकल्पं मन:सु परिपक्वधियां यदासीदित्यादौ'।*

परन्त्वत्र ध्वन्यर्थविषयकज्ञानेन ध्वनिलक्षणस्योपपत्तिर्भवति। 'ध्वन्यतेऽनेनेति ध्वनि'रिति ध्वने: करणसाधनमपि कर्णपूरेण न स्वीकृतम्। तथा सति ध्वनिकरणे काव्येऽपि ध्वनिलक्षणस्य प्राप्तिर्भवति। करणे ध्वनिपदपरामर्शो यथा चन्द्रालोके—

*"साम्मुख्यं विदधानाया: स्फुटमर्थान्तरे गिर:।*
*कटाक्षा इव लीलाक्ष्या व्यापारो व्यञ्जनात्मक:॥"*[6]

ग्रन्थकारस्य मतेन 'ध्वन्यतेऽस्मिन्निति' अधिकरणसाधनमपि न युक्तम्। यतोऽधिकरणव्युत्पत्त्या ध्वनिविषयकज्ञानाधिकरणे पुरुषेऽपि ध्वनिलक्षणस्यातिव्याप्तिर्भवति। तस्मात् कर्मसाधनेन शौत्यपावनत्वाद्यर्थ एव ध्वनिशब्द:। रसभावादिषु वस्त्वलङ्कारादिषु च व्यङ्ग्येष्वर्थेष्वेव ध्वनिपदव्यवहार:। तस्मादुक्तं कविकर्णपूरेण—

*'रसो भावास्तदाभासौ वस्त्वलङ्कार एव च।*
*भावानुमदय: शान्ति: सन्धि: शवलता तथा।*
*सर्वं ध्वनिस्तज्जनित्वे काव्यञ्च ध्वनिरुच्यते॥"*[7]

-रस:, भाव:, रसाभास:, भावाभास:, वस्तु शैत्यपावनत्वादि, उपमाद्यलङ्कार:, व्यभिचारिभावानामुदय:, शान्ति:, शवलता सन्धिश्च- एते सर्वेऽर्था ध्वनिपदवाच्या:। काव्यादेव ध्वनेरुत्पत्तिर्भवति। एवं ध्वनिजनकत्वेन काव्ये ध्वनिपदव्यवहारो भवति, न तु साक्षात्। काव्ये ध्वनिपदव्यवहारो न तु मुख्य:, लाक्षणिकत्वाद् गौण एव।

कविकर्णपूरेणोक्तं यद् ध्वनि: काव्यस्य प्राणा:। परन्तु पञ्चमे किरणे तेनोक्तम्—

*"अथात्मा किल: रस:"।*[8]

अर्थाद् रसध्वनि: काव्यस्य आत्मा। तर्ह्यत्र संशयो दृश्यते। अत्र ग्रन्थकारस्याभिमतमेवं यद्- रसाख्यध्वनिभिन्ना ये ध्वनयस्ते प्राणा:, रसाख्यध्वनिस्तु आत्मा एव—इति व्यवस्थया न दोष:। यतो वस्तुध्वनिरलङ्कारध्वनिश्च रसध्वनौ एव परिणमत:।

ध्वनिलक्षणमालोच्य कविकर्णपूरो ध्वनेर्भेदविषये आलोचयति। ध्वनि: मुख्यतो द्विविधोऽभिधामूलध्वनि: लक्षणामूलध्वनिश्च। कविकर्णपूरो ब्रवीति—

*"उभयोरभिधामूललक्षणामूलयोस्तयो:"।*[9]

उक्तश्च ध्वनिकारेणानन्दवर्धनेन—

*"एवमविवक्षितवाच्य-विवक्षितान्यपरवाच्यत्वेन ध्वनिर्द्विप्रकार: प्रकाशित:"।*[10]

साहित्यदर्पणकारो विश्वनाथोऽपि आह—

*"भदौ ध्वनेरपि द्वावुदीरितौ लक्षणाभिधामूलौ।*
*अविवक्षितवाच्योऽन्यो विवक्षितान्यपरवाच्यश्च॥"*[11]

तत्राविवक्षितवाच्यध्वनि: लक्षणामूल:। यस्मिन् ध्वनौ वाच्यार्थोऽविवक्षितोऽप्रधानीभूतो भवति, तत्र अविवक्षितवाच्यध्वनि:। अस्य ध्वनेर्भेदद्वयं दृश्यते- अर्थान्तरोपसंक्रमितवाच्यध्वनिरत्यन्ततिरस्कृतवाच्यध्वनिश्च। यदुक्तं कविकर्णपूरेण—

*"अर्थान्तरोपसंक्रान्तमत्यन्तं वा तिरस्कृतम्"।*[12]

आनन्दवर्धनोऽपि आह—

*"अर्थान्तरे संक्रमितमत्यन्तं वा तिरस्कृतम्।*
*अविवक्षितवाच्यस्य ध्वनेर्वाच्यं द्विधा मतम्॥"*[13]

साहित्यदर्पणेऽपि दृश्यते—

*"अर्थान्तरं संक्रमिते वाच्येऽत्यन्तं तिरस्कृते।*
*अविवक्षितवाच्योऽपि ध्वनिर्द्वैविध्यमृच्छति॥"*[14]

तत्रादौ अर्थान्तरसंक्रमितवाच्यध्वनि:। यत्र वाच्यार्थ: स्वार्थं परित्यागेन विनैव अन्यार्थेन उपसंक्रान्तो भवति, तत्र अयं ध्वनि: स्यात्। कौस्तुभकार आह—

*"एकं वाच्यमजहत्स्वार्थतयाऽपरार्थेनोपसंक्रान्तं भवति"।*[15]

साहित्यदर्पणकारेणोक्तम्—

*"यत्र स्वयमनुपयुज्यमानो मुख्योऽर्थ: स्वविशेषरूपेऽर्थान्तरे परिणमति तत्र मुख्यार्थस्य स्वविशेषरूपार्थान्तरसंक्रमितत्वादर्थान्तरसंक्रमितवाच्यत्वम्"।*[16]

शब्दस्य वाच्यार्थ: प्रकरणे अनुपयुज्यमनत्वाद् लक्ष्यार्थ आगच्छति। यत्र वाच्यार्थो लक्ष्यार्थेनोपसंक्रान्तो भवति, तत्रार्थान्तरसंक्रमितवाच्यध्वनि: स्यात्।

अथ अत्यन्ततिरस्कृतवाच्यध्वनि:। अत्र वाच्यार्थस्य सम्पूर्णरूपेण परित्यागो भवति, वाच्यार्थ: स्वविपरीतेनार्थेनाक्रान्तो भवति। ग्रन्थकारेणोक्तम्—

*"अन्यज्जहत्स्वार्थतया स्वविपरीतेनार्थेनाक्रान्तं भवति"।*[17]

साहित्यदर्पणकारेणोक्तम्—

*"अत्र पुन: स्वार्थं सर्वथा परित्यजन्नर्थान्तरे परिणमति तत्र मुख्यार्थस्य अत्यन्ततिरस्कृतत्वादत्यन्ततिरस्कृतवाच्यत्वम्"।*[18]

-यत्र शब्दो मुख्यार्थं परित्यज्य अर्थान्तरे परिणमति तत्र वाच्यार्थस्यात्यन्ततिरस्कृतत्वादत्यन्ततिरस्कृतवाच्यध्वनिर्भवति।

**अर्थान्तरोपसंक्रान्तवाच्यध्वनेरुदाहरणम्**

*"फलमपि फलं माकन्दानां सिता अपि ता: सिता*
*अमृतममृतं द्राक्षा द्राक्षा मधूनि मधून्यपि।*
*सह तुलयितुं तेनैतेषां न किञ्चन युज्यते*
*सुवल! यदयं सारङ्गाक्ष्या भवत्यधरोऽधर:॥"*[19]

श्रीकृष्ण: सुवलं प्रत्याह- हे सुवल! आम्राणां फलमपि फलं, सिता अपि सिता:, अमृतमपि अमृतं, द्राक्षाऽपि द्राक्षा, मधूनि अपि मधूनि। तस्या: सारङ्गाक्ष्या अधरोऽपि अधर:। अधरेण सह कस्यापि तुलना न युक्ता।

अत्र द्वितीय: फलशब्दो निन्दादिना अर्थेन उपसंक्रान्त:। फलन्तु कदाचिन्मधुरं, न तु सर्वावस्थायाम्। तस्मात् फलं निन्दनीयम्। अनेनैव सिता अपि पुन: पुन: पाकेन निर्मला भवन्ति, न तु प्रथमावस्थायाम्। अमृतन्तु निकृष्टैर्देवताभि: पीतमिति हेतोरमृतस्यापि निन्द्यत्वम्। द्राक्षा पूर्ववत् पाकावस्थायामेव मधुरा। मधूनि भ्रमरोच्छिष्टानि। अतो निन्दनीयानि।

आम्राणां फलं कदाचिन्मधुरमिति लाक्षणिको बोध:। पश्चाद् व्यञ्जनावृत्त्या फले निन्द्यत्वबोधो लक्षणामूल:। अत्र द्वितीयलाक्षणिकफलपदेन फलत्वरूपेण फलबोधो न भवति। अतोऽत्र ध्वनिरविवक्षितवाच्य:। परन्तु प्रथमफलपदस्य फलरूपार्थो वाच्य:। प्रथम: फलशब्दो वाच्यार्थं न परित्यजति, परन्तु व्यङ्गीभूतनिन्द्यत्वेन संक्रमित:। सितादीनामपि एतादृशं तात्पर्यम्।

श्रीकृष्ण आह- सरङ्गाक्ष्या: श्रीराधाया अधरेण सह कस्यापि तुलना न भवति। यत आम्रादय: पदार्था निन्दनीया:। परन्तु अधरो न निन्दनीय:। श्रीराधाया अधरोऽधर:। अत्र द्वितीयस्याधरपदस्यार्थ:-- 'अधरयति स्वापेक्षया सर्वाण्येव स्वादुवस्तुनि निकृष्टयतीत्यर्थ:'। द्वितीये अधरपदे स्तुत्यर्थो व्यङ्ग्य:। अस्मिन् श्लोके उपमानभूतानां 'फलमपि फल'मित्यादिवाक्यानां द्वितीयफलादिपदस्येव हेयांशतारूपार्थो व्यङ्ग्य:। अत्र सर्वत्र उपमानस्य तिरस्कार एव व्यङ्ग्यो बोध्य:। अत्र वाच्यार्थ: स्वार्थं न परित्यजति परन्तु अन्येनार्थेन संक्रमितो भवति। तस्मादत्र अर्थान्तरोपसंक्रमित-अविवक्षितवाच्यध्वनि:।

अस्य अपरमुदाहरणम्—

*"प्रेम्णा विद्रुतमेकवद्यदुभयोस्तन्मानसं*
*सर्वास्वेव दशासु यन्नवनवं तत् सौहृदम्।*
*यत् कृष्णस्य विनोदभूरहरहस्तद्यौवनं यौवन-*
*न्तद्विच्छेदविधौ न यत् परिचयस्तज्जीवनं जीवनम्॥"*[20]

श्रीकृष्णविरहेण व्याकुला श्रीराधा ललितां प्रत्याह- उभयो: कान्तयो: प्रेम्णा द्रवीभूतं भूत्वा यदेकरूपेण प्रतिभाति तन्मन एव मन:पदवाच्यम्। सर्वासु अवस्थासु यन्नवनवरूपेण प्रतिभाति तत् सौहार्द्यमेव यथार्थ-सौहार्द्यम्। यदहरह: श्रीकृष्णस्य विनोदने समर्थं तद् यौवनमेव यौवनम्। श्रीकृष्णविरहेन सह यस्य परिचयो नासीत्तद् जीवनमेव जीवनम्।अस्मिन् श्लोके द्वितीय'मानस'पदस्य मन:पदवाच्यत्वरूपेण लक्षणा। तस्माद् द्वितीयस्य 'मानस'पदस्य वाच्यार्थोऽविवक्षित:। अनया लक्षणया मनस: श्लाघनीयत्वरूपोऽर्थो व्यङ्ग्य:। तस्मादत्र ध्वनि: लक्षणामूल:। परन्तु प्रथमस्य 'मानस'पदस्य मनरूपार्थो वाच्य:, तथा च श्लाघनीयत्वरूपेणार्थेनोपसंक्रान्त:। अनेनैव द्वितीया: सौहृद-यौवन-जीवन-प्रभृतय: शब्दा उत्कर्षरूपव्यङ्ग्यार्थं प्रतिपादयन्ति। इत्थं श्लोकेऽस्मिन् ध्वनिरर्थान्तरोपसंक्रमित-अविवक्षितवाच्यध्वनि:।

**अत्यन्ततिरस्कृतवाच्यध्वनेरुदाहरणम्**

*"सौभाग्यमेतदधिकं मम नाथ कृष्ण! प्राणैर्ममातनि सुखं प्रणयेन कीर्ति:।*
*दृष्टश्चिरादसि कृपापि तवेयमुच्चैर्न स्मर्यते न भवतात्मगृहस्य मार्ग:॥"*[21]

-काचित् खण्डिता नायिका श्रीकृष्णं प्रति सोल्लुण्ठवचनमाह (प्रियच्छलेन अप्रियं वाक्यम्)- हे प्रिय! मयि तव प्रणयो मम कीर्तिं विस्तारयति। बहुकालात् परं त्वं दृष्टोऽसि, अतो मयि तव कृपा असि। मद्गृहं तवात्मगृहम्। अस्य गृहस्य मार्गं स्मृत्वा त्वमत्र आगतवान्- इति मां निकषा अत्यन्तं सौभाग्यजनकम्। अत्र 'सौभाग्य'पदस्य असौभाग्ये लक्षणा, 'सुख'पदस्य दु:खे लक्षणा, 'आत्मगृह'पदस्य परगृहे लक्षणा। सर्वत्र विरुद्धलक्षणाभिर्नायिकां प्रति श्रीकृष्णस्य प्रेमशूण्यत्वरूपो व्यङ्ग्यार्थोऽभिव्यञ्जित:। अत्र सुस्पष्टरूपेण वाच्यार्थस्य तिरस्कार:। तस्मादत्र अत्यन्ततिरस्कृत- अविवक्षितवाच्यध्वनि:।

अत्र उल्लेखनीयं यद्- ध्वने: द्वितीय: प्रभेदो विवक्षितान्यपरवाच्यध्वनि:। अयं ध्वनिस्तु अभिधामूल:। अस्य लक्षणं कविकर्णपूरानुसारेण—

*"ध्वनिर्यस्त्वभिधामूलस्तत्र वाच्यं विवक्षितम्।*
*तथापि व्यङ्ग्यनिष्ठं स्यात् .................... ॥"*[22]

यस्मिन् ध्वनौ वाच्यं विवक्षितमपि व्यङ्ग्यनिष्ठं सोऽभिधामूलध्वनि:। वाच्यार्थस्य विवक्षायामपि अत्र व्यङ्ग्यार्थस्यैव प्राधान्यं भवति, न तु वाच्यार्थस्य। अयं ध्वनिस्तु द्विविधो-लक्ष्यक्रमव्यङ्ग्योऽलक्ष्यक्रमव्यङ्ग्यश्च। यदुक्तं ग्रन्थकारेण—

*" ................ स च द्वैविध्यमृच्छति।*
*कोऽपि लक्ष्यक्रमव्यङ्गोऽलक्ष्यव्यङ्ग्यक्रमोऽपर:॥"*[23]

ध्वन्यालोके तथा साहित्यदर्पणेऽपि अभिधामूलध्वनेर्भेदद्वयमङ्गीकृतम्। आनन्दवर्धनाचार्य आह—

*"असंलक्ष्यक्रमोद्द्योतः क्रमेण द्योतितः परः।*
*विवक्षिताभिधेयस्य ध्वनेरात्मा द्विधा परः॥"*[24]

विश्वनाथेन चोक्तम्—

*"विवक्षिताभिधेयोऽपि द्विभेदः प्रथमं मतः।*
*असंलक्ष्यक्रमो यत्र व्यङ्ग्यो लक्ष्यक्रमस्तथा॥"*[25]

इत्थं दृश्यते यद् ध्वनेः लक्षणविचारे कविकर्णपूरस्य मौलिकत्वं प्राप्यते। आनन्दवर्धन-मम्मटादीनामालंकारिकानां मतेन ध्वनिः तु काव्यविशेषः, परन्तु कर्णपूरस्य मतेन ध्वनिः मुख्यतया अर्थविशेषः। रसः, भावः, रसाभासः, भावाभासः, वस्तु शैत्यपावनत्वादि, उपमाद्यलङ्कारः, व्यभिचारिभावानामुदयः, शान्तिः, शवलता सन्धिश्च- एते सर्वेऽर्था ध्वनिपदवाच्याः। काव्यादेव ध्वनेरुत्पत्तिर्भवति। एवं ध्वनिजनकत्वेन काव्ये ध्वनिपदव्यवहारो भवति, न तु साक्षात्। काव्ये ध्वनिपदव्यवहारो न तु मुख्यः, लाक्षणिकत्वाद् गौण एव।

**सन्दर्भटीका:**

1.अग्निपुराणम्, ३४५/१४-१८
2. ध्वन्यालोकः, १/१३
3. काव्यप्रकाशः, १/४
4. साहित्यदर्पणः, ४/१
5. अलंकारकौस्तुभः, पृष्ठम् ६५
6. चन्द्रालोकः, ७/२
7. अलंकारकौस्तुभः, पृष्ठम् ६५
8. अलंकारकौस्तुभः, पृष्ठम् ११७
9. अलंकारकौस्तुभः, पृष्ठम् ६६
10. ध्वन्यालोकः २/१
11. साहित्यदर्पणः, ४/२
12. अलंकारकौस्तुभः, पृष्ठम् ६६
13. ध्वन्यालोकः २/१
14. साहित्यदर्पणः, ४/३
15. अलंकारकौस्तुभः, पृष्ठम् ६६
16. साहित्यदर्पणः, पृष्ठम् २५७
17. अलंकारकौस्तुभः, पृष्ठम् ६६
18. साहित्यदर्पणः, पृष्ठम् २५८

19. अलंकारकौस्तुभ:, पृष्ठम् ६७
20. अलंकारकौस्तुभ:, पृष्ठम् ६८
21. अलंकारकौस्तुभ:, पृष्ठम् ६९
22. अलंकारकौस्तुभ:, पृष्ठम् ६९
23. अलंकारकौस्तुभ:, पृष्ठम् ६९
24. ध्वन्यालोक:, २/२
25. साहित्यदर्पण:, ४/४

**परिशिष्टम् :**




**ग्रन्थपञ्जी :**

1. आनन्दवर्धन:। (१९७१)। *ध्वन्यालोक:*। (विमलाकान्त-मुखोपाध्याय:, सं.)। कोलकाता : पुस्तकश्री ।
2. उपाध्याय, व। (१९६६)। *अग्निपुराणम्*। वाराणसी : चौखम्भा-संस्कृत-सिरिज-अफिस्।
3. कविकर्णपूर:। (२०१०)। *अलङ्कारकौस्तुभ:* । (रविशङ्कर-नागर:, सं)। दिल्ली : परिमल-पब्लिकेशन्स्।
4. मम्मट:। (२०१३)। *काव्यप्रकाश:*। (गजाननशास्त्री-मुसलगाँवकर:, सं)। वाराणसी : चौखम्भा-कृष्णदास- अकादमी।
5. विश्वनाथ:। (२००८)। *साहित्यदर्पण:* । (शालग्रामशास्त्री-विद्यावाचस्पति:, सं)। दिल्ली : भारतीय-कला-प्रकाशनम्।